## प्रथने वावशब्दे । (३३/३२०४)

[1]स्तॄञ् आच्छादने (धा.पा.१२५३), [2]अस्माद् धातोः विशब्दे उपपदे घञ् प्रत्ययो भवति प्रथने गम्यमाने, तच्चेत् प्रथनं शब्दविषयं न भवति। प्रथनं विस्तीर्णता। पटस्य विस्तारः[3]। प्रथने इति किम्? तृणविस्तरः। अशब्दे इति किम्? विस्तरो वचसाम्॥

## छन्दोनाम्नि च। (३४/३२०५)

वौ स्त्रः इति वर्तते। विपूर्वात् स्तृणातेः[4] छन्दोनाम्नि घञ् प्रत्ययो भवति। [5]वृत्तमत्र छन्दो गृह्यते यस्य गायत्र्यादयो विशेषाः, न मन्त्रब्राह्मणम्[6], नामग्रहणात्[7]। [8]विष्टारपङ्क्तिः छन्दः। विष्टारबृहती छन्दः। विष्टारपङ्क्तिशब्दोऽत्र [9]छन्दोनाम, न घञन्तं शब्दरूपम्। तत्र त्ववयवत्वेन [10]तद् वर्तते। छन्दोनाम्नि इत्यधि- करणसप्तम्येषा॥

## उदि ग्रहः। (३५/३२०७)

उदि उपपदे ग्रहेर्धातोः घञ् प्रत्ययो भवति। अतोऽपवादः। उद्ग्राहः।

[३०१] [11]छन्दसि निपूर्वादपीष्यते स्रुगुद्यमननिपातनयोः[12]। (म.भा.२.१४८)

[13]हकारस्य भकारः। '[14]उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्'। (वा. सं. १७.६४)॥

## समि मुष्टौ। (३६/३२०८)

ग्रहः [15]इत्येव। समि उपपदे ग्रहेर्धातोः [16]घञ् भवति, मुष्टिविषयश्चेद् धात्वर्थो भवति। मुष्टिः अङ्गुलिसन्निवेशः। अहो मल्लस्य सङ्ग्राहः। अहो मुष्टिकस्य सङ्ग्राहः। दृढमुष्टिता आख्यायते। मुष्टौ इति किम्? सङ्ग्रहो धान्यस्य॥

## परिन्योर्नीणोर्द्यूताभ्रेषयोः। (३७/३२०९)

परिशब्दे निशब्दे च [17]उपपदे यथासङ्ख्यं [18]नियः इणश्च धातोः घञ् प्रत्ययो भवति। अचोऽपवादः। द्यूताभ्रेषयोः, अत्रापि यथासङ्ख्यमेव[19] सम्बन्धः। द्यूतविषयः [20]चेन्नयतेरर्थः, अभ्रेषविषयश्चेद् इणर्थः[21]। पदार्था- नामनपचारो [22]यथाप्राप्तकरणम् अभ्रेषः। द्यूते तावत् – परिणायेन [23]शारान् हन्ति। समन्तान्नयनेन। [24]अभ्रेषे – एषोऽत्र न्यायः। द्यूताभ्रेषयोः इति किम्? [25]परिणयः। न्ययं गतः पापः॥

---

1. स्तृ इति वर्तते अ. ब. क. ड. फ. 2. प्रथने गम्यमाने विपूर्वात् स्तृणोतेः घञ् प्रत्ययो भवति ग, विपूर्वात् स्तृणातेर्धातोः फ, °स्तृणातेरपि ह. 3. कम्बलस्य विस्तारः इत्यधिकम् अ. ब. क. ड. फ. 4. अपि प्राप्ते इत्यधिकम् ह, धातोः इत्यधिकम् ब. 5. वृत्तमिह ब. फ, वृत्तमिह छन्दसो गृह्यते क. 6. कुतः इत्यधिकम् ब. क. 7. लिङ्गात् इत्यधिकम् अ. ड. फ. 8. विष्टारः पंक्तिः छन्दः क. 9. छन्दसो नाम ब. 10. तद् नास्ति अ.फ.ह. 11. छन्दसि तु उन्न्योः उपपदयोः ग्रहेः निपातमनयोः ड. 12. इति वक्तव्यम् इत्यधिकम् अ. 13. हृग्रहोर्भश्छन्दसि अ, हृग्रहोर्भश्छन्दसि इति भत्वम् ह. 14. उद्ग्राहं च निग्राहं च फ. 15. इति वर्तते ब. 16. घञ् प्रत्ययो ब.ड. फ. ह. 17. यथासंख्यमुपपदे ह. 18. नयतेः फ. 19. एव सम्बन्धः नास्ति ह. 20. नयत्यर्थो भवति फ. ह. 21. भवति इत्यधिकम् फ. 22. यथाप्राप्तस्य करणम् अ. ड. 23. सारीन् अ. 24. अभ्रेषिः ब. 25. परिणयो वध्वाः ब. ड.